योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०९९

एकोनशततमः सर्गः ९९

श्रीराम उवाच ।

कासौ महाटवी ब्रह्मन्कदा दृष्टा कथं मया ।

के च ते पुरुषास्तत्र किं तत्कर्तुं कृतोद्यमाः ।। १

श्रीवसिष्ठ उवाच ।

रघुनाथ महाबाहो श्रृणु वक्ष्यामि तेऽखिलम् ।

न सा महाटवी राम दूरे नैव च ते नराः ।। २

येयं संसारपदवी गम्भीराऽपारकोटरा ।

तां तां शून्यां विकाराढ्यां विद्धि राम महाटवीम् ।। ३

विचारालोकलभ्येयं यदैकेनैव वस्तुना ।

पूर्णा नान्येन संयुक्ता केवलेव तदैव सा ।। ४

तत्र ये ते महाकाराः पुरुषाः प्रभ्रमन्ति हि ।

मनांसि तानि विद्धि त्वं दुःखे निपतितान्यलम् ।। ५

द्रष्टा योऽयमहं तेषां सविवेको महामते ।

विवेकेन मया तानि दृष्टान्यन्येव नानघ ।। ६

मया तान्येव बोध्यन्ते विवेकेन मनांसि हि ।

सततं सुप्रकाशेन कमलानीव भानुना ।। ७

मत्प्रबोधं समासाद्य मत्प्रसादान्महामते ।

मनांसि कानि चित्तानि गतान्युपशमात्परम् ।। ८

कानिचिन्नाभिनन्दन्ति मां विवेकं विमोहतः ।

मत्तिरस्कारवशतः कूपेष्वेव पतन्त्यधः ।। ९

ये तेऽन्धकूपा गहना नरकास्ते रधूद्वह ।

कदलीकाननं यानि संप्रविष्टानि तानि तु ।। १०
स्वर्गैकरसिकानि त्वं मनांसि ज्ञातुमर्हसि ।
प्रविष्टान्यन्धकूपान्तर्निर्गतानि न यानि तु ।। ११
महापातकयुक्तानि तानि चित्तानि राघव ।
कदलीकाननस्थानि निर्गतानि न यानि तु ।। १२
पुण्यसंभारयुक्तानि तानि चित्तानि राघव ।
करञ्जवनयातानि निर्गतानि न यानि तु ।। १३
तानि मानुष्यजातानि चित्तानि रघुनन्दन ।
कानिचित्संप्रबुद्धानि तत्र मुक्तानि बन्धनात् ।। १४
कानिचिद्बहुरूपाणि योनेर्योनिं विशन्ति हि ।
मनांसि तानि तिष्ठन्ति निपतन्त्युत्पतन्ति च ।। १५
यत्तत्करञ्जगहनं तत्कलत्ररसं विदुः ।
दुःखकण्टकसंबाधं मानुष्यं विविधैषणम् ।। १६
करञ्जगहनं यानि प्रविष्टानि मनांसि तु ।
मानुष्ये तानि जातानि तत्रैव रसिकानि च ।। १७
कदलीकाननं यत्तच्छशाङ्ककरशीतलम् ।
तन्मनोह्लादनकरं स्वर्गं विद्धि रघूद्वह ।। १८
कानिचित्पुण्यभूतेन तपसा धारणात्मना ।
धारयन्ति शरीराणि संस्थितान्युदितान्यपि ।। १९
यैरहं पुंभिरबुधैर्बुद्धिचित्ततिरस्कृतः ।
तैर्मनोभिरनात्मज्ञैः स्वविवेकस्तिरस्कृतः ।। २०
त्वया दृष्टो विनष्टोऽस्मि त्वं मे शत्रुरिति द्रुतम् ।
यदुक्तं तद्धि चित्तेन गलता परिदेवितम् ।। २१
रुदितं यन्महाक्रन्दं पुंसा बह्वाशु राघव ।
तद्भोगजालं त्यजता मनसा रोदनं कृतम् ।। २२
अर्धप्राप्तविवेकस्य न प्राप्तस्यामलं पदम् ।

चेतसस्त्यजतो भोगान्परितापो भृशं भवेत् ।। २३

रुदताङ्गानि दृष्टानि कारुण्येनावबोधिना ।

कष्टमेतानि संत्यज्य किं प्रयामीति चेतसा ।। २४

अर्धप्राप्तविवेकस्य न प्राप्तस्यामलं पदम् ।

चेतसस्त्यजतोऽङ्गानि परितापो हि वर्धते ।। २५

हसितं तु यदानन्दि पुंसा मदवबोधतः ।

परिप्राप्तविवेकेन तत्तुष्टं राम चेतसा ।। २६

परिप्राप्तविवेकस्य त्यक्तसंसारसंस्थितेः ।

चेतसस्त्यजतो रूपमानन्दो हि विवर्धते ।। २७

हसताङ्गानि दृष्टानि पुंसा यान्युपहासतः ।

तानि दृष्टानि मनसा विप्रलम्भपदानि ह ।। २८

मिथ्याविकल्परचितैर्विप्रलब्धमहो चिरम् ।

इत्यङ्गान्युपहासेन दृष्टानि स्वानि चेतसा ।। २९

मनः प्राप्तविवेकं हि विश्रान्तं वितते पदे ।

प्राक्तनादीनताधारं हसन्पश्यति दूरतः ।। ३०

यदसौ समवष्टभ्य मया पृष्टः प्रयत्नतः ।

तद्विवेको बलाच्चित्तमादत्त इति दर्शितम् ।। ३१

यदङ्गानि विशीर्णानि गतान्यन्तर्धिमग्रतः ।

तच्चित्तेन विनार्थाशा शाम्यतीति प्रदर्शितम् ।। ३२

सहस्रनेत्रहस्तत्वं यत्पुंसः परिवर्णितम् ।

तदनन्ताकृतित्वं हि चेतसः परिदर्शितम् ।। ३५

यदात्मनि प्रहारौघैः पुमान्प्रहरति स्वयम् ।

तत्तत्कुकल्पनाघातैः प्रहरत्यात्मनो मनः ।। ३४

पलायते यत्पुरुषः स्वात्मनः प्रहरन्स्वयम् ।

स्ववासनाप्रहारेभ्यस्तन्मनः प्रपलायते ।। ३५

स्वयं प्रहरति स्वान्तं स्वयमेव स्वयेच्छया ।

पलायते स्वयं चैव पश्याज्ञानविजृम्भितम् ।। ३६

स्ववासनोपतप्तानि सर्वाण्येव मनांसि हि ।

स्वयमेव पलायन्ते गन्तुं युक्तानि तत्पदम् ।। ३७

यदिदं विततं दुःखं तत्तनोति स्वयं मनः ।

स्वयमेवातिखिन्नं तु पुनस्तस्मात्पलायते ।। ३८

संकल्पवासनाजालैः स्वयमायाति बन्धनम् ।

मनो लालामयैर्जालैः कोशकारकृमिर्यथा ।। ३९

यथानर्थमवाप्नोति तथा क्रीडति चञ्चलम् ।

भाविदुःखमपश्यन्स्वं दुर्लीलाभिरिवार्भकः ।। ४०

अपश्यन्काष्ठरन्ध्रस्थवृषणाक्रमणं यथा ।

कीलोत्पाटी कपिर्दुःखमेतीदं हि तथा मनः ।। ४१

चिरपालनया चैव चिरभावनया तथा ।

अभ्यासात्तुच्छतामेत्य न भूयः परिशोचति ।। ४२

मनःप्रमादाद्वर्धन्ते दुःखानि गिरिकूटवत् ।

तद्वशादेव नश्यन्ति सूर्यस्याग्रे हिमं यथा ।। ४३

यावज्जीवमनिन्द्यया च रमते शास्त्रार्थसंजातया

तुल्यं वासनया मनो हि मुनिवन्मौनेन रागादिषु ।

पश्चात्पावनपावनं पदमजं तत्प्राप्य तच्छीतलं

तत्संस्थेन न शोच्यते पुनरलं पुंसा महापत्स्वपि ।। ४४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपाये उत्पत्तिप्रकरणे चित्तोपाख्यानं नामैकोनशततमः सर्गः ।। ९९ ।।